**M.A. 1st Semester Examination, 2023**

**SANSKRIT (PG)**

PAPER – SAN-102

Full Marks : 40 Time : 2 hours

*The figures in the right-hand margin indicate marks.*
*Canditates are required to give their answers in their own words as far as practicable.*
*Illustrate the answers wherever necessary.*

**सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्।**

**A. यथाकामं प्रश्नचतुष्टयं समाधेयम्।** 2x4=8

1. शतपथब्राह्मणम् कस्मिन् वेदे विद्यते ? तस्य नामकरणे किं बीजम् ?
2. के वषट्काराः ? योगक्षेमौ कौ ?
3. हरिश्चन्द्रः कः आसीत् ? तस्य पुत्रस्य नाम किम् ?
4. केनोपनिषदः प्रथमे मन्त्रे शिष्यस्य प्रश्नः कः ?
5. यक्षः अग्निं किं पृष्टवान्, अग्निश्च किमुत्तरं दत्तवान् ?
6. एषणाः कति ? काश्च ताः ?

**B. यथेच्छं चत्वारः प्रश्नाः समाधेयाः।** 4x4=16

1. टीकां लिखत- ब्रह्मयज्ञः।
2. आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।
   शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति।।
3. तज्जाया जाया भवति यदस्यां जायते पुनः।
   आभूतिरेषा भूतिर्बीजमेतन्निधीयते।।
4. न तत्र चक्षुर्गच्छति न वाग्गच्छति न मनो

न विद्मो न विजानीमो यथैतदनुशिष्यात्।
अन्यदेव तद्विदितादथो अविदितादधि।।

5. इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टि:।
भूतेषु भूतेषु विचित्य धीरा: प्रेत्यास्माल्लोकादमृता भवन्ति।।

6. यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिता:।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।।

**C. यथेच्छं प्रश्नद्वयस्य सविस्तरम् उत्तरं लिखत।** 8x2=16

1. पञ्चमहायज्ञानां वैशिष्ट्यानि समासेन समन्त्रम् आलोचयत।
2. शुन:शेपाख्यानमाश्रित्य इन्द्र-रोहितसम्वाद: सम्यगालोच्यताम्।
3. केनोपनिषदि प्रतिपादितं ब्रह्मतत्त्वम् आलोचयत।
4. बृहदाण्यकोपनिषदि जनक-याज्ञवल्क्यसंवादस्य सारं समासेन लिखत।